# Shivarya Shatakam

# શિવાર્યાશતકમ્

## Document Information

Text title : Shivarya Shatakam

File name : shivAryAshatakam.itx

Category : shiva, moropanta, shataka

Location : doc_shiva

Author : Mayurakavi or Moropanta

Proofread by : Rajesh Thyagarajan

Description/comments : Stotras composed by Moropanta mayUrakavi

Latest update : December 23, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

December 23, 2023

*sanskritdocuments.org*

Shivarya Shatakam

# શિવાર્યાશતકમ્

(* ઉપાતિચ્છન્દઃ)

કાચિત્સોમા ધવલા કૃતવિષકવલા પટીયસી દેવી ।
જટિલા શશધરનિટિલા કુહિતકુટિલા નમસ્યા મે ॥ ૧॥

અસ્તુ નિરઞ્જનમેકં વસ્તુ ત્રય્યાઃ શિરોભાગે ।
અરુણં તરુણીધરણં વિલસત્કરુણં તુ નઃ શ્રેયઃ ॥ ૨॥

નૈગમપટલીરૂઢં મનસિ નિરૂઢં જગત્ત્રય્યાઃ ।
હિમગિરિરત્નસમૂઢં સ્મરતિ ન મૃઢં કુતશ્ચેતઃ? ॥ ૩॥

અયિ! । મામનાથમલ્પં કરુણાજલ્પં પ્રભો! પાહિ ।
જહિ વા વિરુદાકલ્પં કલ્પં કલ્પં યમાધરસે ॥ ૪॥

વિષયવિષાશનમત્તં વિષયિષુ યત્તં સ્મરારાતે ! ।
સ્મર માં મુહુરનિમિત્તં યદિ તવ ચિત્તં કૃપાયોનિઃ ॥ ૫॥

કિં ન ચ્છિન્નં શમ્ભો ! । યદિ ભવદમ્ભો વિવૃદ્ધોઽસૌ ।
પરમિહ ભવહરમપરં વિઘ્નો ન પરમ્પરાજાલે ॥ ૬॥

વિષપીયૂષનિકેતન! । ધૃતવિષકેતન ! ભવારાતે !
ચેતિતવિષ્ટપચેતન! કરુણાવેતનમિદં કુરુ મે ॥ ૭॥

વ્યાલાકલિતજટાલાદિહ વિધુભાલાં દદક્ષિણે બાલાત્ ।
ન હિ રે ! કણ્ઠે કાલાત્કલિતકપાલાત્પરં કિઞ્ચિત્ ॥ ૮॥

કાચિત્કદનિતમદના ચિત્સુખસદના તનૂ ગૌરી
ગૌરીચુમ્બિતવદના ચન્દિરરદના નમસ્યા મે ॥ ૯॥

કાચિચિદિહ સદારા દાહિતદારા મમેદાનીમ્ ।
કરુણાપારાવારા જગદાકારા પુરઃ પશ્ચાત્ ॥ ૧૦॥

કપિલઃ કાલીશાલી વીટપપાલી જગજ્જીવઃ ।

હરિહરમસ્તકમાલી મનસિ કપાલી સદા ધ્યેયઃ ॥ ૧૧॥

ઐરાવણેન્દુવર્ણા શોભિતકર્ણા ફણીન્દ્રાભ્યાં ।
વામે વિલસદપર્ણા શિવમિતિવર્ણા તનુર્ધ્યેયા ॥ ૧૨॥

ન વયં વેદવિધિજ્ઞા ન ચ કૃતયજ્ઞાઃ કૃતજ્ઞા વા ।
કિં સ્વાશાપટલં પટમકપટમીશં પ્રપશ્યામઃ ॥ ૧૩॥

વિષ્વકરુણાવેષા દત્તાશેષા સ્વભક્તેભ્યઃ ।
શેષાકલ્પવિશેષા જગતઃ શેષા તનુઃ પાયાત્ ॥ ૧૪॥

શમનઃ શ્રેણીશમની શમદમગમનીયમાહાત્મ્યા ।
ભૂતિઃ કાપિ ચ રમણી સ્વીકૃતરમણી મુદે નઃ સ્યાત્ ॥ ૧૫॥

નિરયત્રાસનિહન્ત્રી બુદ્ધિનિયન્ત્રી મુમુક્ષૂણાં ।
કલિતકલામયતન્ત્રી ગિરિજારન્ત્રી તનુર્ધ્યેયા ॥ ૧૬॥

બાલકલાધરચૂલા સુહૃદનુકૂલા જગજ્જનની ।
ધ્યોતચર્મદુકૂલા ધૃતત્રિશૂલા તનુર્જયતિ ॥ ૧૭॥

અલસં જડમતિચપલં કિતવં ધૂર્તં શઠં હૃષ્ટં ।
વિષમિવ વિષયિણમપિ માભિધેહિ ત્રિપુરાન્તક! સ્વપદોઃ ॥ ૧૮॥

ભુજગાન્કર્તું ભુજગાનનલં નિટિલે વિષં કણ્ઠે ।
નૈવ વિવેકસ્તેઽભૂદર્તું પદયોઃ ક્ષમામેવ ॥ ૧૯॥

ત્વત્તો માતુસ્તાતાદિહ નો ધાતા પુરારાતે ! ।
નાપિ ચ ભવતઃ પાતાદપરઃ પાતાસ્તિ કિં કુર્મઃ ॥ ૨૦॥

વેદાવેદિતશોધાઃ પ્રત્યગ્યોધાઃ શ‍ૃણુધ્વં મે ।
અર્ધાઙ્ગાહિતદારં પરમોદારં મહઃ શ્રેયઃ ॥ ૨૧॥

તર્કાદુદર્કભાજાં કર્કશવાચાં પ્રપઞ્ચોઽયમ્ ।
યચ્છ્રીકણ્ઠે તેજસિ સત્યપિ સિદ્ધાન્તમિચ્છન્તઃ ॥ ૨૨॥

સઙ્ખ્યા સઙ્ખ્યાહીનં સઙ્ખ્યાવન્તો બ્રુવન્તુ સઙ્ખ્યેં ।
પશ્યન્ત્વથવા વલ્લયાં વલ્લ્યાં ભિલ્લીચરં કઞ્ચિત્ ॥ ૨૩॥

તાવદ્ધર્મોઽધર્મસ્તાવત્કર્માપ્યકર્મૈવ ।
યાવત્રિગુણવિલાસી નિગમનિવાસી નુતો નેશઃ ॥ ૨૪॥

યદિદં નિગમવિચારે સ્મૃતિસંસારેઽપિ યથાવત્ ।
તદિદં નિખિલાધારં સારં કૈલાસકુઞ્જેષુ ॥ ૨૫॥

વિષધરવિષયવિષાદં મામવિષાદં ધરઃ સ્વપદોઃ ।
નો ચેત્રિભુવનરક્ષણવિરુદં ભવતોઽદ્ય ભારાય ॥ ૨૬॥

કાચિચ્ચિત્તકુટીરે ચિત્પટપેટીગતા મૂર્તિઃ ।
ઉદ્ભટતટિનીમુકુટા ઘટતો રટતઃ સ્ફુટં મેઽસ્તિ ॥ ૨૭॥

કાચિચ્ચિત્તચમત્કૃતિરુગ્રા સોમાસિતા કાલી ।
સ્ત્રીપુંસ્તનુરપ્યેકા ચિન્ત્યવિવેકા મુદે નસ્તાત્ ॥ ૨૮॥

ન હિ રે! । કાચન ચિન્તા ત્રિજગચિન્તામણિઃ શમ્ભુઃ ।
અન્તઃ પરિતઃ પુરતઃ સ્ફુરતિ પ્રેમ્ણા સમાકૃતઃ ॥ ૨૯॥

મન્ત્રૈઃ કિં કિં તન્ત્રૈરપિ કિં વેદાન્તસિદ્ધાન્તૈઃ ।
યાવત્તત્ત્વગુરૂણાં ગુરુરયમાશો ન સર્વસ્વમ્ ॥ ૩૦॥

માસ્તુ મમાગમબોધો માસ્તુ ચ શોધોઽપિ સર્વત્ર ।
અસ્તુ શ્રુતિષુ યદેકં વસ્તુ સ્વાન્તે મૃડાન્યેવ ॥ ૩૧॥

સ્મરહર પુરહર ભવ હર શિવ મૃડ ગિરિશેતિ અલ્પતામગ્રે ।
ભૃત્યાયતે સુરેજ્યઃ કાલો બાલાયતે સદ્યઃ ॥ ૩૨॥

નાહં વિભેમિ કાલાન્નો ભવજાલાદપિ ભ્રષ્ટઃ ।
દીનાનાથત્રાતરિ પાતરિ શિરસિ સ્થિતે સ્થાણૌ ॥ ૩૩॥

શિવદઃ શમ્ભુઃ શઙ્કર ઈશ્વર એવાસિ સર્વેષુ ।
વામેષુ બામદેવો દેવ ! ત્વં મત્કૃતે સ્થાણુઃ ॥ ૩૪॥

સન્તતમાદ્રિનિવાસાત્કઠોરનામ્નાવનૌ નીતઃ ।
અપિ કાકોલહરત્વાત્કરુણાકૂપાર એવાસિ ॥ ૩૫॥

દગ્ધે દિવિદ્વૃન્દે પરિતઃ પ્લુષ્ટેઽપિ ગોવિન્દે ।
બ્રહ્માણ્ડમણ્ડપેઽસ્મિન્ક્ષુબ્ધે દવેઽાશ એવ ત્વમ્ ॥ ૩૬॥

પયસા પ્લાવિતસત્યે કૂમ઼ વૈકુણ્ઠ આકણ્ટે ।
સ્મારિતવિષ્ટપવૃત્ત ધર્તા ત્વં સ્વેવ ગઙ્ગાયાઃ ॥ ૩૭॥

વૃન્દાયામપિ વિષ્ણું તદ્વત્પરમેષ્ઠિનં ચ કન્યાયાં ।
યુઙ્ક્ત્વાપ્યતો જિગીષુઃ સ્મર્તવ્યાત્મા સ્મરસ્ત્વત્તઃ ॥ ૩૮॥

ગર્વાદખર્વકર્તા ત્વહમિતિ ભાવાદૃતો બોધઃ ।
ત્વામપિ સવિધે વિમનંશ્છિન્નઃ કાપાલભૂષાયૈ ॥ ૩૯॥

કેચિદ્વદન્તિ ગુણિનં નિર્ગુણમેકેઽપિ વિદ્વાંસઃ ।
નિર્ણેતુમેવ ધત્સે ત્રિગુણીં મુણ્ડાવલિં નિત્યઃ ॥ ૪૦॥

નિત્યાનિત્યવિવેકે નિત્યસ્ત્વત્તોઽસ્તિ નૈવાન્યઃ ।
નિખિલં ત્વમેવ દગ્ધા ધત્સે ભસ્માઙ્ગરાગાય ॥ ૪૧॥

ભસ્માસુરોઽપિ કશ્ચિદ્ધસ્મરશક્તિઃ પુરા ભક્તઃ ।
વિસ્મૃતશૈવચપેટઃ કપટી ભસ્મૈવ સઞ્જાતઃ ॥ ૪૨॥

ખ્યાતસ્ત્વમેવ દેવસ્ત્વમેવ નિખિલે મહાદેવઃ ।
રુદ્રાદન્યાભાવે સ નાસ્મિ વિષ્ણુર્ન વા ધાતા ॥ ૪૩॥

ધાતુસ્ત્વમેવ ધાતા પાતા વિષ્ણોશ્ચ વિષ્ણુત્વાત ।
અપિ ચ હરસ્ય હરસ્ત્વં નાતસ્ત્રાતઃ પરા કાષ્ટા ॥ ૪૪॥

કાષ્ઠાવાસો વાસો યસ્ય ત્રૈલોક્યધૃલીષુ ।
યુક્તં નિખિલે દગ્ધે શેષાવાસશ્ચ વાસાય ॥ ૪૫॥

વાસો યસ્ય હૃદબ્જે ભાસઃ સર્વેષુ ભૂતેષુ ।
હાસઃ કાલો નૃત્યાદ્દાસસ્તસ્યાહમેકસ્ય ॥ ૪૬॥

એકસ્ય દ્વે નિયમાત્કશ્ચિદ્દ્વૈપશ્ચિતોઽસ્સ્વર્થઃ ।
જાનેઽહં તુ યદઙ્ગે ગિરિજાગઙ્ગે તમેવૈકમ્ ॥ ૪૭॥

એકો રુદ્રઃ પ્રથમા સર્વો રુદ્રઃ પરા બૃતે ।
પરમૃગ્યજુષોક્તીનાં સિદ્ધઃ સિદ્ધાન્ત એવૈકઃ ॥ ૪૮॥

એકોઽહં તુ બહુ સ્યામનયા વાચૈવ સા સિદ્ધિઃ ।
તસ્માત્સિદ્ધિનિદાનં રુદ્રં જાનન્તુ ભદ્રાય ॥ ૪૯॥

ભદ્રાય રાજમુદ્રા વેદો બ્રૂતે શિવઃ શિવદઃ ।
નાતઃ પુમર્થસિદ્ધિઃ કાચિત્કશ્ચિન્ન સિદ્ધાન્તઃ ॥ ૫૦॥

સિદ્ધાન્તાદરદૂરં દૂરત્વાન્નામ પીયૂષાત્ ।
પીયૂષાંશુકલાધરધર માં ચાનાથનાથત્વાત્ ॥ ૫૧॥

નાથ! । ત્વામનુયાતસ્યાધઃપાતઃ કથં મે સ્યાત્ ।

સ્યાદથ દૈવનિયોગાદ્યોગાભક્ત્યાથ મુક્ત્યા ચ ॥ ૫૨॥

મુક્ત્યાલમસ્તુ ભક્તિપ્રસાદલભ્યો મમાસ્ત્વિષ્ટઃ ।
બ્રહ્માણ્ડવ્રજબીજઃ કૈલાસાદ્રિદ્રુમઃ કશ્ચિત્ ॥ ૫૩॥

કશ્ચિદ્ગિરિજાવલ્લીવાતો લલિતો જગત્પર્ણૈઃ ।
સ્વાન્તાલવાલવાસી સ્મૃત્યા ફલિતો ભવેત્સદ્યઃ ॥ ૫૪॥

સદ્યઃ પાપવિનાશઃ સદ્યસ્ત્રૈતાપિકી શાન્તિઃ ।
સદ્યઃ સકલસુખાનાં સિદ્ધિર્ભવિતા શિવસ્મરણાત્ ॥ ૫૫॥

સ્મરણાદેવ હિ દેવા મરણાન્મુક્તાઃ સુખં ચેરુઃ ।
સ્મરણાદેવ મુનીશાઃ શમ્ભોઃ કારુણ્યપાત્રાણિ ॥ ૫૬॥

પાત્રાણિ તાનિ મન્યે હિમગિરિકન્યેશપૂર્ણાનિ ।
શેષાણિ ખર્પરાણિ પ્રાયો વિણ્મૂત્રદિગ્ધાનિ ॥ ૫૭॥

દિગ્ધાનિ ભાન્તિ યેષાં ભસિતૈર્ભાલાનિ ભાગ્યેન ।
ધન્યાસ્ત એવ વન્યા નાન્યાન્મન્યામહે નૂનમ્ ॥ ૫૮॥

નૂનં વિભૂતિકવચાઃ શિવમૃડરુદ્રેતિ દિવ્યાસ્ત્રાઃ ।
ત્રિષુ લોકેષુ જયન્તઃ સન્તતમન્તઃ કૃપાવન્તઃ ॥ ૫૯॥

કૃપયા તેન વિમુક્તા જીવન્મુક્તાસ્ત એવૈતે ।
યેષામન્તઃકરણે જગદાવરણેશ્વરઃ શમ્ભુઃ ॥ ૬૦॥

શમ્ભુર્મુક્તિલતાયા મણ્ડપ એવાસ્તિ નિશ્ચિતં ફલવાન્ ।
યસ્તામિચ્છતિ કશ્ચિત્સુતતં મનસા શ્રયેત્સ્વસ્થઃ ॥ ૬૧॥

સ્વસ્થસ્તદેવ ભવિતા ભવિતા સિદ્ધિસ્તદા કાચિત્ ।
સુરનરફણિનામવિતા ત્રિજગત્સવિતા સદા ધ્યાતઃ ॥ ૬૨॥

ધ્યાતઃ શુદ્ધમનોભિઃ ખ્યાતઃ શ્રૌતાર્થવિસ્તારૈઃ ।
જ્ઞાતઃ પરમગુરુભ્યોઽસ્યાતઃ શમ્ભોરહં ભૃત્યઃ ॥ ૬૩॥

ભૃત્યઃ કૃતાતિકૃત્યઃ શમ્ભોરેવાસ્તિ નાન્યસ્ય ।
કુપિતે કદાપ્યગસ્ત્યે સિન્ધુર્બિન્દૂપમો જાતઃ ॥ ૬૪॥

જાતો દશાવતારી ભૃગુણા શપ્તોઽપિ ગોવિન્દઃ ।
ગોવિન્દોઽપિ યદીયો મધુહા મુરહાથ લક્ષ્મીશઃ ॥ ૬૫॥

લક્ષ્મીશ્વરોઽથ ચક્રી ખગપતિરપિ યો જગત્રાતા ।
વરદે ગૌરીરમણે વિષ્ણુર્દૈત્યાન્તકો જાતઃ ॥ ૬૬॥

જાતો મરત્યવશ્યં મૃત્યોર્જાયેત વા નિરયી ।
પ્રાપ્તે કાયનિકાયે શિવમેવાલમ્બ રે ચેતઃ! ॥ ૬૭॥

ચેતસ્તવૈવ ભાગ્યાચ્ચક્ષુઃશ્રોત્રાસ્યમુખ્યાનિ ।
સન્તીન્દ્રિયાણિ યાવત્તાવત્સમ્ભાવયેશાનમ્ ॥ ૬૮॥

ઈશાનમેવ શરણં વ્રજતો મરણં તુ મોક્ષાય ।
નો ચેન્માયાવરણં વ શિવાચરણં વિના નશ્યેત્ ? ॥ ૬૯॥

નશ્યેત્પાપકલાપઃ શિવ શિવ જપ્તે ક્વ સન્તાપઃ ?
સ્યાદથ કોઽપિ દુરાપઃ સુમેરુચાપઃ પુરઃ પશ્ચાત્ ॥ ૭૦॥

પશ્ચાત્તાપનિમિત્તં બ્રૂમશ્ચિતં પ્રતિ ક્ષોભાત્ ।
સ્મર રે! શિવેતિ વિત્તં ભિત્ત્વા ભિત્તં તુ વિષયાણામ્ ॥ ૭૧॥

વિષયાણામપિ ચિન્તા કા તવ ચિન્તા ।
શિવ શિવ શિવેતિ જતે શિવ એવં ત્વં ન સન્દેહઃ ॥ ૭૨॥

સન્દેહોઽપિ ન કશ્ચિત્સર્યો રુદ્રઃ શ્રુતિર્બૂતે ।
તસ્માદ્ભાવનયાહં બધ્દ્વો મુક્તોઽહમિત્યુક્તિઃ ॥ ૭૩॥

ઉક્તિસ્તાવદ્દ્વિવિધા વિદ્યાઽવિદ્યાત્મિકા ભવતિ ।
વિદ્યા શિવપદફલદાઽવિદ્યા સંસારભોગાય ॥ ૭૪॥

ભોગાયાપિ શ્ચેદ્ધ્યાતો દદ્યાત્સ સદ્ભોગાન્ ।
વિષયપ્રેમજભોગો ભુક્તો ભવતૈવ રોગાય ॥ ૭૫॥

રોગાયૌષધમકં દૃષ્ટ્વા નૈકં વદામ્યેતત્ ।
એકા પુણ્યત રઙ્ગા ગઙ્ગા ગઙ્ગાધરોઽપ્યેકઃ ॥ ૭૬॥

એકો વસ્તુવિવેકો ધાત્રામેકોપનિષદુક્તઃ ।
શિવમિતિ સ પરિચ્છેકો ન ચેતિ ભેકોપમો બ્રૂતે ॥ ૭૭॥

બ્રૂતે યસ્તુ કદાચિચ્છિવેતિ નામાક્ષરદ્વિતયં ।
તસ્ય તદેવ ભવાહે મુક્તિર્ભુક્તિશ્ચ મુક્તિશ્ચ ॥ ૭૮॥

મુક્તિઃ શમદમસિધ્દ્વા યસ્યાઃ સિધ્દ્વા અપિ ભ્રષ્ટાઃ ।
ભ્રષ્ટા અપિ શિવભક્ત્યા સ્રષ્ટારસ્તે તુ શાસ્ત્રાણામ્ ॥ ૭૯॥

શાસ્ત્રાણિ સન્તુ દૂરં દૂરં મન્ત્રાશ્ચ તન્ત્રાણિ ।
નેદીયસીહ ચેતસિ નિત્યાનન્દે જગત્કન્દે ॥ ૮૦॥

કન્દં છિનત્તિ જનુષાં ભિનત્તિ ભેદભ્રમં સદ્યઃ ।
યચ્છતિ રૂપમરૂપં ચિત્તમચિન્તામણેઃ શમ્ભોઃ ॥ ૮૧॥

શમ્ભોર્ધ્યાનમમન્દં જ્ઞાનાનન્દં નયત્યુચ્ચૈઃ ।
અશ્રમમપિ તન્મન્દાસ્ત્યજન્તિ પાપે ચ યુઞ્જન્તિ ॥ ૮૨॥

યુઞ્જન્તિ યોગમપરે ભોગં ભુઞ્જન્તિ ચૈવાન્યે ।
અસ્માકમપ્યભઙ્ગા તૃપ્તિગઙ્ગાધરઃ કશ્ચિત્ ॥ ૮૩॥

કશ્ચિચ્ચિદમ્બુમાલી જટિલો વ્યાલીન્સદ્વ્યાલઃ ।
શૂલી બ્રહ્મકપાલી વિભૂતિશાલી સ નઃ પાયાત્ ॥ ૮૪॥

પાયાદપાયહન્તા પુઙ્ગવગન્તા પુરારાતિઃ ।
મુનિજનમાનસરન્તા માનસસન્તાપદાવાગ્નિઃ ॥ ૮૫॥

દાવાગ્નેરપ્યધિકઃ સમ્ભવમરણોદ્ભવો વ્યાધિઃ ।
શાન્તિસ્તદૈવ ભવિતા ભવિતા ભર્ગશ્ચ વૈદ્યશ્ચેત્ ॥ ૮૬॥

ચેદદ્ય નીલકણ્ઠં ભવગજકણ્ઠીરવં સ્મરસિ ।
તર્હિ ત્વમેવ જન્તો! બહુવિધમન્તો સુખી ભવિતા ॥ ૮૭॥

ભવિતા તદૈવ સર્વં શ‍ૃણુ ગતગર્વં કિમપ્યન્તઃ ।
જપતઃ સર્વદશર્વં દુઃખમસર્વં સુખાય સ્યાત્ ॥ ૮૮॥

સ્યાદિહ કોઽપિ ન પાતા પાતકપાતાદહં જાને ।
દૈવાદ્ગિરિજાજાનેરપરઃ શપથોઽસ્તિ તત્પદયોઃ ॥ ૮૯॥

પદયોરધરીભૂતે વિધુરીભૂતોઽસિ ચેન્નાથ! ।
કઃ કટુ મધુરીકુરુતે ત્વત્તોઽપ્યન્તરધુરીણસ્ત્વમ્ ॥ ૯૦॥

ત્વં મે માતા તાતસ્રાતા ભ્રાતા ગુરુર્દેવઃ ।
ત્વં મે જીવસ્ત્વત્તઃ પરમં પરમં ન મે કિઞ્ચિત્ ॥ ૯૧॥

કિઞ્ચિત્કાચિત્કશ્ચિત્રિતયં તાવદ્ભવત્યર્વાક્ ।
શિવલિઙ્ગાદેકસ્માત્સ્ફુરન્તિ સર્વાણિ લિઙ્ગાનિ ॥ ૯૨॥

લિઙ્ગાનિ પૂર્વદેવૈર્દેવઃ સર્વેષુ લોકેષુ ।

નત્વા હરિહરમુખ્યૈર્લબ્ધાનીષ્ટાનિ નિષ્ઠાતઃ ॥ ૯૩॥

નિષ્ઠા વિમલજ્ઞાનં નિષ્ઠા ભક્તિશ્ચ વૈરાગ્યં ।
નિષ્ઠૈવ સંશયાનાં હન્ત્રી નિષ્ટા શિવં દત્તે ॥ ૯૪॥

દત્તે ભાવિતમન્તર્ધત્તે ત્વીયેષુ કૃત્યેષુ ।
નિત્યૈવ નિત્યમીશો યસ્તં મત્યા શ્રયેદન્તઃ ॥ ૯૫॥

અન્તઃ શુખમનોભિઃ સન્તઃ પશ્યન્તિ યત્તેજઃ ।
ગૌરં તદેવ ગૌરીલમ્પટમપટં પ્રપશ્યામઃ ॥ ૯૬॥

પશ્યન્તસ્ત્વામીશં કે પરમીશં પ્રપશ્યન્તિ ।
અભજન્તોઽપિ ભજન્તં કે પરમં તં ન પશ્યન્તિ ॥ ૯૭॥

પશ્યન્તિ શાશ્વતં તે પદમિહ શમ્ભોઃ પદે લગ્નાઃ ।
અપરે પતતિ સદ્યઃ પરિતઃ ક્લિશ્યન્તિ વા ભગ્નાઃ ॥ ૯૮॥

ભગ્નાસ્ત એવં લોકે ત એવ શોકે નિમજ્જન્તિ ।
યૈરધિવાણિ ભવાનીપતિરિહ નાનીયતે યત્નાત્ ॥ ૯૯॥

મોદાદન્તર્ગોધાધરમદ્ઘતો દાપતુત્યૈ યે (?)
દધતિ વિષયાપનોદાનપહસ્તો દારભાસસ્તે ॥ ૧૦૦॥

ભાસન્ત એવ વાસા યેષાં વાસાય વિગ્વાસાઃ ।
તેઽપિ સુખોલ્લાસા વૈ શૈવા શૈવસ્ય દેવતાકારાઃ ॥ ૧૦૧॥

(અનુષ્ટુપ્છન્દઃ)
ઇદમાર્યાપતેરાર્યાશતમાર્યાઃ પઠન્તિ યે ।
તે તુ શૈવાગમાચાર્યા નાત્ર કાર્યા વિચારણા ॥ ૧૦૨॥

ઇત્યાકૂતમયૂરેશશૈવેનાઽઽશૈવશાસનાત્ ।
ઉપગીત્યૈવ ગીતાનાં ગાતા વીશઃ પ્રસીદતુ ॥ ૧૦૩॥

ઇતિ શ્રીરામનન્દનમયૂરેશ્વરકૃતં શિવાર્યાશતકં સમ્પૂર્ણમ્ ।
ટિપ્પણિ
* અસ્ય શતકસ્યૈતત્કવિકૃતત્વે સંશતે નશ્ચતઃ । નાસ્ય નામાપિ કવિલિખિતસ્વકૃતગ્રન્થાવલ્યામુપલભ્યતે । ન ચ કાપિ માતૃકા । કાવ્યસઙ્ગ્રહકારૈસ્તુ શતકમેતદ્યથા મુદ્રિતં તથૈવાસ્માભિર્મુદ્યતે । સન્તિ ખલ્વત્ર બહવ એવાશુદ્ધયઃ । અપેક્ષ્યન્તે ચ કચિત્કતિપયે વર્ણાઃ । યદ્યપ્યન્તે “ઇદમાર્યાપતેરાર્યાશતમ્” ઇત્યાદિ લિખ્યતે તથાપિ તત્પરલિખિતં સ્યાદિત્યસ્તિ નો વિશ્વાસઃ । તાદૃશસ્યોલ્લેખસ્ય કુત્રાપ્યેતત્કવિકાવ્યેઽદર્શનાત્ ।

Proofread by Rajesh Thyagarajan

*Shivarya Shatakam*

pdf was typeset on December 23, 2023

Please send corrections to *sanskrit@cheerful.com*